
नवमः पाठः

# सुस्वागतं भो! अरुणाचलेऽस्मिन्



अरुणाचलप्रदेशस्य एकस्मिन् विद्यालये अद्य उत्सवस्य वातावरणम्। सुसज्जिते प्रवेशद्वारे सुन्दरैः अक्षरैः लिखितम्– 'स्वागतं कुर्मः'। तदैव छात्राणाम् एकः दलः तत्र प्रविशति। तेषां स्वागताय प्रवेशद्वारम् उभयतः स्थितः बालसमूहः मधुरस्वरेण गायति–

**यः सप्तराज्येषु विभासमानः,**
**तरङ्गिणी यत्र च लोहिताख्या।**
**'ईटा' हि यस्यास्ति पुरी प्रधाना,**
**सुस्वागतं भो! अरुणाचलेऽस्मिन्॥**

(तदैव विद्यालयस्य प्रधानाचार्यः तत्र आगच्छति।)

**प्रधानाचार्यः** – अस्मिन् मनोरमे अरुणाचलप्रदेशे भवतां सर्वेषां हार्दिकं स्वागतम्।

**छात्राः** – अनुगृहीताः वयम्। अस्य मनोहरप्रदेशस्य विषये ज्ञातुं समुत्सुका स्मः।

**प्रधानाचार्यः** – जानामि। एतदर्थमेव सभागारे प्रदेशस्य मान्यः पर्यटनाधिकारी युष्मान् प्रतीक्षते। आगम्यतां तत्र एव चलामः।

नवमः पाठः

# सुस्वागतं भो! अरुणाचलेऽस्मिन्

(विद्यालयस्य सभागारः। मञ्चे विद्यालयस्य प्रधानाचार्यः, प्रदेशस्य पर्यटनाधिकारी केचित् अध्यापकाः च उपविष्टाः सन्ति।)

**पर्यटनाधिकारी** – (ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्राः। अभिनन्दनं भवताम् अस्मिन् प्रदेशे। प्रसीदामि यत् भवन्तः अस्य रम्यस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः। एतदर्थं स्थलानां दर्शनाय प्रबन्धः अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि। प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि। अस्य प्रदेशस्य नाम 'अरुणाचलः' कथं जातम्? अनुमीयताम्।

**हिमांशुः** – अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः।

**पर्यटनाधिकारी** – शोभनम्। उचितम् उक्तम्। हिमाद्रितुङ्गशृङ्गैः सुशोभिता सूर्योदयभूमिः इयम्। अतः अरुणाचलः। अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति। विपुला च अत्र वनसम्पदा। वनौषधीनां तु अयं स्रोतः एव। पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः। सर्वत्र हरीतिमा। शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि।

**सर्वे** – एवम् ----------

**सुधाकरः** – अस्य प्रदेशस्य राजधानी का?

**पर्यटनाधिकारी** – 'ईटानगरम्' अस्य प्रदेशस्य राजधानी।

**श्यामा** – महोदय! अत्रत्यजनजातीनां कानि प्रमुखानि आजीविका-साधनानि?

**पर्यटनाधिकारी** – कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि।


**रविः** – मान्यवर! अस्य प्रदेशस्य प्रमुखाः उत्सवाः के?

**पर्यटनाधिकारी** – साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः। 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु फरवरी इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। 'होली' सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्वसमं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते।

**हिमांशुः** – अस्माभिः 'मिथुन' इति विषये अपि किञ्चित् श्रुतम्। किं तत्?

**पर्यटनाधिकारी** – 'मिथुनः' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।


**शोभा** – वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः।


चीन
चीन
चीन
दिबांग वैली जिला
नागालैंड
वेस्ट सियांग
जिला
अपर
सियांग जिला
इंकियांग
अनिनी
ईस्ट
सियांग
जिला
लोहित जिला
अपर
सुबंसिरी जिला
दापोरिजो
अलोंग
तेजू
लोअर
सुबंसिरी जिला
पासीघाट
तिब्बत
जीरो
तवांग जिला
तवांग
ईस्ट
कामेंग जिला
वेस्ट
कामेंग जिला
सेप्पा
चांगलांग जिला
चांगलांग
दिरांग
बोमडीला
पापुमपारे जिला
खोंसा
तिरप जिला
बर्मा
उ
नागालैंड
असम
अरुणाचल प्रदेश

**पर्यटनाधिकारी** – मया पूर्वम् एव उक्तं यत् अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः प्रबन्धः अपि अस्ति। अधुना तु वयम् अनेन प्रक्षेपकयन्त्रेण केषाञ्चित् स्थलानां परिचयं प्राप्स्यामः। पश्यत एतत् चित्रम्।

**राजीवः** – किम् एतत् कस्यचित् दुर्गस्य चित्रम्?

**पर्यटनाधिकारी** – आम्! एतत् दिवाङ्ग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम्! अस्य अवशेषाः तु आर्यकला-संस्कृति-सम्पदः परिचायकाः। अधुना इदं चित्रं पश्यत।



**शैलेशः** – अहं जानामि इदं स्थानम्! इदं तु 'तवाङ्ग गोम्पा' इति प्रसिद्धः बौद्धमठः।

**पर्यटनाधिकारी** – सम्यक् अभिज्ञातम्! मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अयं बौद्धमठः। पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम्। लोहितजनपदे अपि अनेकबौद्धविहाराः सन्ति।

**नीलिमा** – मान्यवर! मया अस्य प्रदेशस्य 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम्! किम् इदम्?

**पर्यटनाधिकारी** – आम्! एतत् कुण्डं तु लोहितनद्याः किञ्चिद् दूरे अस्ति। पूर्वम् इदं ब्रह्मकुण्डम् आसीत्। इदं लोहितनद्याः उद्गमस्थलम् इति मन्यते। अत्र अनेकानि अन्यानि दर्शनीयानि स्थलानि अपि सन्ति। अस्माकं पर्यटनविभागेन प्रकाशितां केषाञ्चित् प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि--

| पर्यटनस्थलम् | स्थानम् |
|---|---|
| मालिनीथान-मन्दिरम् | पश्चिमी-सियाङ्ग-मण्डलम् |
| भालुकपोङ्ग-उपक्षेत्रम् | पूर्व-कामेङ्ग-मण्डलम् |
| ईटानगरदुर्गम् | ईटा-नगरम् |
| आकाशी-गङ्गा | अलोङ्गे-मार्गः |
| चोरतेनस्तूपः | जिमिथाङ्ग-गोलकम् |
| विजयनगरस्तूपः | मियाव-गोलकम् |
| ताम्रेश्वरी-मन्दिरम् | लोहित-मण्डलम् |
| शिवलिङ्गगुहा | सुम्बसिरी-मण्डलम् |

**अभयारण्यानि**

ईटानगर-वन्य-जीव-उद्यानम्

पखुई-वन्य-जीव-उद्यानम्

इरिङ्ग-स्मारक-वन्य-जीव-उद्यानम्

ईगलनेस्ट-वन्य-जीव-उद्यानम्

नामदफा-राष्ट्रिय-उद्यानम्

**सर्वे** – अधुना तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुकाः स्मः।

**प्रधानाचार्यः** – शोभनम्। एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते। कार्यक्रमस्तु सुनिश्चितः। जलपानाद् अनन्तरं गमिष्यामः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनुगृहीताः** (वि०)(प्र०ब०व०) [अनु+ग्रह्+क्त] | कृतार्थाः | अनुगृहीत किए गये | favoured, obliged. |
| **अनुमीयताम्** (क्रि०) (प्र०पु०ए०व०) [अनु+मी+यक्+लोट्] | अनुमानं कुरुत | अनुमान कीजिए | guess. |
| **अभिज्ञातम्** (क्रि०) (नपुं०प्र०ए०व०) [अभि+ज्ञा+क्त] | विद्धम् | पहचाना गया | recognised. |
| **उपत्यका** (सं०) (स्त्री०प्र०ए०व०) | पर्वतस्य निम्नभूभागः | पर्वत की तलहटी | valley. |

| | | | |
|---|---|---|---|
| **जिज्ञासाम्** (सं०) (द्वि०ए०व०) [ज्ञा+सन्+अ+टाप्] | ज्ञानेप्सा, ज्ञानेच्छा | कुतूहल | anxiety to know. |
| **ध्वनिविस्तारयन्त्रम्** (सं०) (नपुं०प्र०ए०व०) [ध्वनेः विस्तारस्य यन्त्रम्, ष०त०पु०] | ध्वनिप्रवर्धकम् | ध्वनि विस्तारकयन्त्र | The loud speaker. |
| **पर्यटनाधिकारी** (सं०) (पु०प्र०ए०व०) [पर्यटनस्य अधिकारी, ष०त०पु०] | पर्यटनप्रमुखः | पर्यटन अधिकारी | Tourist officer. |
| **पर्यावरणम्** (सं०) (नपुं०प्र०ए०व०) [परि+आ+वृ+ल्युट्] | प्रकृतेः परिवेशः | प्राकृतिक परिवेश | environment. |
| **प्रक्षेपकयन्त्रेण** (सं०) (तृ०ए०व०) [प्रक्षेपकस्य यन्त्रेण, ष०त०पु०] | प्रकाशप्रक्षेपणयन्त्रेण | प्रक्षेपकयन्त्र से | by Projector. |
| **प्रतीक्षते** (क्रि०) (प्र०पु०ए०व०) [प्रति+ईक्ष्+लट्] | प्रतीक्षां करोति | प्रतीक्षा करता है | waits upon. |
| **प्रत्युत** (अव्य०) | किन्तु | बल्कि | but. |
| **मञ्चे** (सं०) (पु०स०ए०व०) [मञ्च+घञ्] | मञ्चस्य उपरि | मञ्च पर | on the stage. |
| **लिम्पन्ति** (क्रि०) (प्र०पु०ब०व०) [लिम्प्+लट्] | लेपनं कुर्वन्ति | लीपते हैं, पोतते हैं | anoint. |
| **विभासमानः** (वि०) (पु०प्र०ए०व०) [वि+भास्+शानच्] | शोभमानः, प्रकाशितः | सुशोभित | shining. |
| **शालिचूर्णम्** (सं०) (नपुं०प्र०ए०व०) [शालेः चूर्णम्, ष०त०पु०] | अक्षतचूर्णम् | चावल का आटा | Rice-flour. |
| **शिल्पम्** (सं०) (नपुं०प्र०ए०व०) | कलाकृतिः | कला | art or craft. |
| **समुत्सुकाः** (वि०) (पु०प्र०ए०व०) | उत्साहयुक्ताः, उत्कण्ठिताः | अत्यन्त इच्छुक | Anxiously desirous. |
| **सुरम्यम्** (वि०) (नपुं०प्र०ए०व०) [सु+रम्+यत्] | सुन्दरम् | आनन्ददायक, सुन्दर | pleasant. |
| **सेतुनिर्माणम्** (सं०) (द्वि०ए०व०) [सेतोः निर्माणम्, ष०त०पु०] | आलिनिर्माणम् | पुल अथवा बान्ध का निर्माण | Construction of the bridge or dam. |
| **हिमाद्रितुङ्गशृङ्गैः** (सं०) (तृ०ब०व०) [हिमस्य अद्रिः, ष०त०, तुङ्गानि शृङ्गाणि तुङ्गशृङ्गाणि, कर्मधा०, हिमाद्रेः तुङ्गशृङ्गाणि तैः, ष०त०] | हिमालयशिखरैः | हिमालय की उन्नत चोटियों से | by the elevated peaks of Himalayas. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| अरुणाचलेऽस्मिन् | = | अरुणाचले+अस्मिन् | पर्यटनाधिकारी | = | पर्यटन+अधिकारी |
| प्रियच्छात्राः | = | प्रिय+छात्राः | एतदर्थम् | = | एतत्+अर्थम् |
| प्रश्नोत्तरमाध्यमेन | = | प्रश्न+उत्तरमाध्यमेन | अरुणाचलः | = | अरुण+अचलः |
| हिमाद्रितुङ्गशृङ्गैः | = | हिम+अद्रितुङ्गशृङ्गैः | सूर्योदयभूमिः | = | सूर्य+उदयभूमिः |
| पञ्चाशदधिकाः | = | पञ्चाशत्+अधिकाः | वनौषधीनाम् | = | वन+ओषधीनाम् |
| प्रत्युत | = | प्रति+उत | महोदय | = | महा+उदय |
| चैव | = | च+एव | प्रमुखोत्सवाः | = | प्रमुख+उत्सवाः |
| किञ्चित् | = | किम्+चित् | केषाञ्चित् | = | केषाम्+चित् |
| किञ्चिद्दूरे | = | किम्+चित्+दूरे | कार्यक्रमस्तु | = | कार्यक्रमः+तु |
| जलपानाद् अनन्तरम् | = | जलपानात् +अनन्तरम् | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| अध्यापकाः+च | = | अध्यापकाश्च | अति+उत्सुकाः | = | अत्युत्सुकाः |
| तु+अहम् | = | त्वहम् | एव+एकम् | = | एवैकम् |
| अतः+अरुणस्य | = | अतोऽरुणस्य | प्रदेशः+अरुणाचलः | = | प्रदेशोऽरुणाचलः |
| सूर्योदयभूमिः+इयम् | = | सूर्योदयभूमिरियम् | च+अत्र | = | चात्र |
| तु+अयम् | = | त्वयम् | स्रोतः+एव | = | स्रोत एव |
| सुगन्धिः+च | = | सुगन्धिश्च | युक्तस्य+अस्य | = | युक्तस्यास्य |
| प्रकृतिः+एव | = | प्रकृतिरेव | संस्कृतिः+अपि | = | संस्कृतिरपि |
| कृषिः+शिल्पकला | = | कृषिश्शिल्पकला | प्रमुखाः+उत्सवाः | = | प्रमुखा उत्सवाः |
| अत्र+अनेके | = | अत्रानेके | इति+अस्ति | = | इत्यस्ति |
| इति+अपि | = | इत्यपि | पर्व+इदम् | = | पर्वेदम् |
| प्रबन्धः+अपि | = | प्रबन्धोऽपि | अधुना+इदम् | = | अधुनेदम् |
| जानामि+इदम् | = | जानामीदम् | सम्यक् +अभिज्ञातम् | = | सम्यगभिज्ञातम् |
| स्थली+इयम् | = | स्थलीयम् | लोहितजनपदे+अपि | = | लोहितजनपदेऽपि |
| दर्शनीयस्थलविषये+अपि | = | दर्शनीयस्थलविषयेऽपि | दूरे+अपि | = | दूरेऽपि |
| अत्र+अनेकानि+अन्यानि | = | अत्रानेकान्यन्यानि | अन्यानि+अपि | = | अन्यान्यपि |

**संयोगः**

देवानामपि = देवानाम्+अपि

## अभ्यासः

**1. एकपदेन उत्तरत –**

(क) सूर्योदयभूमिः अरुणाचलः कैः सुशोभिता? ..................................................

(ख) अरुणाचले कति नद्यः वहन्ति? ..................................................

(ग) अरुणाचलस्य पर्यावरणं कीदृशम्? ..................................................

(घ) देवानामपि देवः कः कथ्यते? ..................................................

(ङ) अरुणाचलस्य राजधानी का? ..................................................

(च) लामासम्प्रदायस्य प्रमुखं पर्व किम्? ..................................................

(छ) अरुणाचलस्य विशिष्टः राजपशुः कः? ..................................................

(ज) 'तवाङ्ग गोम्पा' केषां मठः? ..................................................

**2. एतेषां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत –**

(क) अरुणः कस्य पर्यायः?

..................................................................................................................

(ख) सूर्योदयभूमिः इति पदं कस्मै प्रयुक्तम्?

..................................................................................................................

(ग) अरुणाचलप्रदेशस्य जनजातीनां प्रमुखानि आजीविकासाधनानि कानि सन्ति?

..................................................................................................................

(घ) 'ओरिया' इति केषां प्रमुखं पर्व?

..................................................................................................................

(ङ) लामासम्प्रदायस्य 'लोसर' इति पर्व कदा मान्यते?

..................................................................................................................

(च) 'मोपीन' इति कीदृशं पर्व अस्ति?

..................................................................................................................

(छ) लोहितनद्याः उद्गमस्थलं किं मन्यते?

..............................................................................................................

**3. अधोलिखितवाक्येषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) अरुणाचलप्रदेशे पञ्चाशदधिका नद्यः प्रवहन्ति।

..............................................................................................................

(ख) अरुणस्य प्रदेशः अरुणाचलः।

..............................................................................................................

(ग) अरुणाचले अनेके उत्सवाः मान्यन्ते।

..............................................................................................................

(घ) वनौषधीनां तु अयं स्रोतः एव अस्ति।

..............................................................................................................

(ङ) 'ओरिया' इति पर्वणि अरुणाचले कृषिभूमिपूजनं सामाजिककार्यं च भवति।

..............................................................................................................

(च) भीष्मक-नगर-दुर्गस्य अवशेषाः आर्य-कला-संस्कृति-सम्पद्-परिचायकाः।

..............................................................................................................

(छ) परशुरामकुण्डं लोहितनद्याः किञ्चिद् दूरम् अस्ति।

..............................................................................................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत -**

(क) 'स्थलानां दर्शनाय प्रबन्धः अपि वर्तते।' अत्र 'वर्तते' इति क्रियापदस्य कर्तृपदं किम्?

(ख) 'मिथुनः गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।' वाक्येऽस्मिन् विशेष्यपदं किं प्रयुक्तम्?

(ग) 'साडकेन एकम् अन्यत् पर्व अस्ति।' अत्र 'अपरम्' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(घ) 'जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति।' वाक्येऽस्मिन् किं क्रियापदं प्रयुक्तम्?

(ङ) 'पर्यटनविभागेन प्रकाशितां प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम्।' अत्र 'सूचीम्' इति पदस्य किं विशेषणपदं प्रयुक्तम्?

**5. विशेष्यैः सह समुचितविशेषणानि योजयित्वा लिखत –**

| | | | | |
|---|---|---|---|---|
| (क) | विविधवर्णमनोहरा | पर्व | ...................... | ...................... |
| (ख) | प्रमुखानि | राजपशुः | ...................... | ...................... |
| (ग) | सामाजिकम् | आजीविकासाधनानि | ...................... | ...................... |
| (घ) | अन्यत् | ऐतिहासिकस्थलानि | ...................... | ...................... |
| (ङ) | सम्पूर्णा | कार्यम् | ...................... | ...................... |
| (च) | दर्शनीयानि | प्रकृतिः | ...................... | ...................... |
| (छ) | गोमहिषसदृशः | व्यवस्था | ...................... | ...................... |

**6. अधोलिखितपदैः सह समानार्थकपदं योजयित्वा लिखत –**

| | | | | |
|---|---|---|---|---|
| (क) | अभिनन्दनम् | अपितु | ...................... | ...................... |
| (ख) | ज्ञातुम् | पश्चात् | ...................... | ...................... |
| (ग) | अरुणः | अवगन्तुम् | ...................... | ...................... |
| (घ) | समम् | इदानीम् | ...................... | ...................... |
| (ङ) | अधुना | सदृशम् | ...................... | ...................... |
| (च) | प्रत्युत | स्वागतम् | ...................... | ...................... |
| (छ) | अनन्तरम् | सूर्यः | ...................... | ...................... |

**7. अधोलिखितवाक्येषु स्थूलपदानि केभ्यः प्रयुक्तानि?**

**यथा** अहं **भवतां** जिज्ञासां शमयितुम् इच्छामि। छात्राणां कृते/छात्रेभ्यः

(क) प्रथमं तु **अहम्** एव एकं प्रश्नं पृच्छामि। ..................................................

(ख) सूर्यस्य प्रकाशः सर्वप्रथमम् **इमं** स्पृशति। ..................................................

(ग) **अहं** चिन्तयामि यत् अरुणः तु सूर्यस्य पर्यायः। ..................................................

(घ) कृषिः, शिल्पकला वनसम्पद् च **एतेषां** प्रमुखानि आजीविकासाधनानि। ..................................................

(ङ) **इदम्** 'अप्रैल' इति मासे मान्यते। ..................................................

(च) अधुना तु वयम् **एतानि** द्रष्टुम् उत्सुकाः स्मः। ..................................................

(छ) **अत्र** अनेके प्रमुखोत्सवाः। ..................................................

8. **अधोलिखितपदानां समुचितं विग्रहं समस्तपदं वा लिखत–**

(क) वनसम्पदा ......................................................................

(ख) सेतोः निर्माणम् ......................................................................

(ग) पर्यटनाधिकारी ......................................................................

(घ) हिमाद्रेः तुङ्गशृङ्गानि, तैः ......................................................................

(ङ) बौद्धमठः ......................................................................

(च) उद्गमस्य स्थलम् ......................................................................

(छ) अरुणाचलः ......................................................................

9. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं समुचितार्थं चित्वा लिखत –**

(क) प्रश्नोत्तरमाध्यमेन भवतां **जिज्ञासां** शमयितुम् इच्छामि।

(i) गन्तुम् इच्छा (ii) ज्ञातुम् इच्छा (iii) गातुम् इच्छा

(ख) अस्य अवशेषाः तु आर्यकला-संस्कृति-सम्पदः **परिचायकाः**।

(i) सूचकाः (ii) सेवकाः (iii) पर्यटकाः

(ग) **साधु** पृष्टम्।

(i) संन्यासी (ii) शुद्धम् (iii) सम्यक्

(घ) **विपुला** च अत्र वनसम्पदा।

(i) पृथ्वी (ii) विशाला (iii) स्थूला

(ङ) वनौषधीनां तु अयं **स्रोतः** एव।

(i) उद्गमस्थलम् (ii) प्रवाहः (iii) निर्झरः

10. **अत्र लिखिते गद्यांशे रिक्तस्थानानां पूर्तिम् 'इदम्' इति सर्वनामपदस्य उचितरूपैः कुरुत –**

अरुणस्य प्रदेशः अरुणाचलः। ..................... प्रदेशस्य अस्ति हिमाद्रितुङ्गशृङ्गैः सुशोभिता भूमिः। एवञ्च अस्ति विपुलवनसम्पदा ..................... प्रदेशे। .....................प्रदेशात् एव वहति लोहिताख्या नदी। सूर्यस्य प्रकाशः सर्वप्रथमम् .....................प्रदेशम् एव स्पृशति। .....................प्रदेशेन एव जीवन्ति .....................प्रदेशस्य जनाः। अद्भुतः सौन्दर्यमयः एव ..................... प्रदेशः।

# योग्यताविस्तारः

( न परीक्षाकृते )

**भावविस्तारः**

**नद्यः** अरुणाचले पञ्चाशदधिकनद्यः प्रवहन्ति। तत्र कमेंग-सुबंसिरी-सियोग-लोहित-दिवाङ्ग-तिरप-नाम्न्यः प्रमुखाः नद्यः। 'ब्रह्मपुत्र' नाम्न्याः नद्याः अपि अत्र उद्गमः। सदियास्थले दिहांग-दिवाङ्ग नद्योः 'लोहिता' इति नद्या सह सङ्गमः एव 'ब्रह्मपुत्र' इति नाम भवति।

**वनसम्पदा** अत्रत्या वनसम्पदा विपुला। अस्य प्रदेशस्य ६२ प्रतिशतं भागः वनाच्छादितः। अस्मिन् प्रदेशे विविधवृक्षाणां वनानि सन्ति। क्वचित् तु चीरपर्णः / सरलः देवदारु-अगर-रुद्राक्षवृक्षाणां सघनवनानि सन्ति, क्वचित् सेमल-वालनट-ओक-पाइन-मेकाई-वृक्षाणाम् अरण्यानि। नारङ्ग-आम्ल-कंटघर-अनन्नास-लीची फलपादपाः प्रचुराः। जाङ्गलाः कदली-फलतरवः तु पर्याप्ताः एव।

**वनौषधयः** अस्मिन् प्रदेशे वनौषधीनां प्राचुर्यं वर्तते, येषां चिकित्सायाम् उपयोगः भवति। यथा अकरकरा-ममीरे-अगर-पादपाः बहुलाः। एकमेव (कृमिनाशकः, सर्पदंशहरः), सप्तवर्णः (कृमिनाशकः, कुष्ठघ्नः कफघ्नः रक्तशोधकश्च)। अर्जुनः (हृदयरोगे लाभकरः), बहिर्रा (बहेड़ा) कब्जरोगे, हरड़ (कृमिनाशकः), ब्राह्मी (स्मरणशक्ति-वर्धिका), चित्रकं (चर्मरोगे), बिडंगः (रक्तशोधकः), वचा (वातहरः), अगरुः (वातकफनाशकः), नामकेशरः (कफपित्तशामकः), दारु-हरिद्रा (वेदनानाशकम्)।

**मिथुनः** मिथुनः गो-महिषयोः सङ्कररूपः विशिष्टः पशुः। तस्य अग्रभागः महिषस्य इव पृष्ठः भागः च गो इव भवति।

**धनेशः** 'धनेशः' च दीर्घचञ्चुचर्चितः विशिष्टः राजपक्षी अस्ति।

**जनजातयः** अरुणाचलः जनजातीनाम् एव प्रदेशः। तत्र माम्मा, मिजी, ऑका, निसी, गोलोंग, डिगारो वाङ्चो प्रमुखाः जनजातयः वसन्ति।

**कृषिः** अत्र कृषिः द्विधा भवति-झूमकृषिः जलकृषिः च। पर्वते जङ्गलान् स्वच्छीकृत्य या कृषिः भवति सा झूमकृषिः कथ्यते। उपत्यकासु जलकृषिः भवति।

**दर्शनीयस्थानानि** अधः 'क' स्तम्भे दर्शनीयस्थानानि 'ख' स्तम्भे च तेषां मण्डलानां नामानि। एतानि ध्यानेन पठत अवगच्छत च

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (क) मालिनी-स्थानम् | (i) पश्चिमी-सियांगे स्थितम् |
| (ख) भीष्मकनगर-दुर्गम् | (ii) लोहितमण्डले स्थितम् |
| (ग) शिवलिङ्गगुहा | (iii) निम्नतर-सुबंसिरी मण्डले स्थितम् |
| (घ) 'नागदफा' इति राष्ट्रिय-उद्यानम् | (iv) चाङ्गलाङ्गमण्डले स्थितम् |
| (ङ) तवाङ्गगोम्पा | (v) तवाङ्गमण्डले स्थितम् |

**भाषाविस्तारः**

1. **अधः कानिचित् पदानि दत्तानि। तेषां प्रकृतयः गोलाकारेषु प्रत्ययाः च चतुर्भुजेषु लिखिताः। ध्यानेन पठत पदानां परिचयं च प्राप्नुत**

| पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|
| पृष्टम् = | प्रच्छ् | क्त |
| आगत्य = | आ+गम् | ल्यप् |
| ज्ञातुम् = | ज्ञा | तुमुन् |
| द्रष्टुम् = | दृश् | तुमुन् |
| दर्शनीयानि = | दृश् | अनीयर् |
| जातः = | जन् | क्त |
| अभिज्ञातम् = | अभि+ज्ञा | क्त |
| प्रसिद्धाः = | प्र+सिध् | क्त |
| पठित्वा = | पठ् | क्त्वा |

2. **पर्वन् ( उत्सवः ) नपुंसकलिङ्गम्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पर्व | पर्वणी | पर्वाणि |
| द्वितीया | पर्व | पर्वणी | पर्वाणि |
| तृतीया | पर्वणा | पर्वभ्याम् | पर्वभिः |
| चतुर्थी | पर्वणे | पर्वभ्याम् | पर्वभ्यः |
| पञ्चमी | पर्वणः | पर्वभ्याम् | पर्वभ्यः |
| षष्ठी | पर्वणः | पर्वणोः | पर्वणाम् |
| सप्तमी | पर्वणि | पर्वणोः | पर्वसु |
| सम्बोधनम् | हे पर्व, हे पर्वन् | हे पर्वणी | हे पर्वाणि |

**अनुरूपशब्दाः-** कर्मन् (काम), शर्मन् (सुख), वर्मन् (कवच), जन्मन् (जन्म), वर्त्मन् (रास्ता), ब्रह्मन् (ब्रह्मा), चर्मन् (चमड़ा)

## प्रहेलिका

**एकचक्षुः न काकोऽयं बिलमिच्छन्नपन्नगः।**
**क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥**

एकं चक्षुः अस्ति परन्तु काकः नास्ति, बिलम् अन्विष्यति परन्तु पन्नगः नास्ति, क्षयः भवति वृद्धिरपि भवति परन्तु समुद्रः नास्ति, चन्द्रोऽपि नास्ति। तर्हि एतत् किम्?

## एहि हसाम

कश्चन नवयुवकः पत्नीम् उक्तवान्- "अयि प्रिये! अद्य आवाम् उपाहारमन्दिरे भोजनं कुर्वः।

**पत्नी** – किमर्थम्....? मम पाकस्य स्वादः सम्यक् न भवति वा?

**पतिः** – (मन्दध्वनिना) न..न,स्वादः तु सम्यक् एव भवति। किन्तु अद्य अतीव श्रान्तः अस्मि। अतः पात्रप्रक्षालने मम इच्छा नास्ति।